श्री दत्तात्रेय द्वादशनाम स्तोत्रं

श्री दत्तात्रेय द्वादशनाम स्तोत्रं

श्री गणेशाय नमः |
अस्य श्रीदत्तात्रेयद्वादशनामस्तोत्रमंत्रस्य परमहंस ऋषिः |
श्रीदत्तात्रेय परमात्मा देवता | अनुष्टुप्छंदः |
सकलकामनासिद्ध्यर्थे जपे विनियोगः |
प्रथमस्तु महायोगी द्वितीयः प्रभुरीश्वरः |
तृतीयश्च त्रिमूर्तिश्च चतुर्थो ज्ञानसागरः ||1||

पंचमो ज्ञानविज्ञानं षष्ठःस्यात् सर्वमंगलं |
सप्तमः पुंडरीकाक्षो अष्टमो देववल्लभः ||2||

नवमो नंददेवेशो दशमो नंददायकः |
एकादशो महारुद्रः द्वादशः करुणाकरः ||3||

एतानि द्वादशनामानि दत्तात्रेय महात्मनः |
मंत्रराजेति विख्यातं दत्तात्रेय हरः पराः ||4||

क्षयोपस्मार कुष्ठादि तापज्वरनिवारणं |
राजद्वारे पथेऽघोरे संग्रामेषु जलांतरे ||5||

गिरे गृहांतरेऽरण्ये व्याघ्रचोरभयादिषु |
आवर्तने सहस्रेषु लभंते वांछितं फलं ||6||

त्रिकालं यः पठेन्नित्यं मोक्षसिद्धिमवाप्नुयात् |
दत्तात्रेय सदा रक्षेद्यशः सत्यं न संशयः ||7||

विद्यार्थी लभते विद्यां रोगी रोगात् प्रमुच्यते |
अपुत्रो लभते पुत्रं दरिद्रो लभते धनं ||8||

अभार्यो लभते भार्यां सुखार्थी लभते सुखं |
मुच्यते सर्वपापेभ्यो सर्वत्र विजयी भवेत् ||9||

इति श्रीदत्तात्रेयद्वादशनामस्तोत्रं संपूर्णं ||

श्रीदत्तात्रेयार्पणमस्तु ||